# तृतीयः अभ्यासः

# प्रत्ययाः

❖ **अधः प्रदत्तम् आरेखं पश्य**

प्रत्ययाः
- (क) कृत्प्रत्ययाः
- (ख) तद्धितप्रत्ययाः
- (ग) स्त्रीप्रत्ययौ

## (क) कृत्प्रत्ययाः

- पूर्वकक्षासु वयं क्त्वा, ल्यप्, तुमुन्, क्त, क्तवतु प्रत्ययान् पठितवन्तः। एते सर्वेऽपि प्रत्ययाः कृत्प्रत्ययाः सन्ति।
- कृत्प्रत्ययाः धातुभिः सह प्रयुक्ताः भवन्ति।
- अधुना अन्यान् कृत्प्रत्ययान् पठामः।

## तव्यत्-अनीयर् - प्रत्ययौ

❖ **एषः अस्माकं पुस्तकालयः अत्र द्वे सूचनापट्टे स्तः। अत्र लिखितान् निर्देशान् पठत –**

| किं कर्त्तव्यम् | किं न कर्त्तव्यम् |
|---|---|
| 1. पुस्तकालये अनुशासनं **पालनीयम्**। | 1. कोलाहलः न **कर्त्तव्यः**। |
| 2. पुस्तकालये पठित्वा पुस्तकानि उत्पीठिकायाम् एव **त्यक्तव्यानि**। | 2. पुस्तकेषु किमापि न **लेखनीयम्**। |
| 3. पुस्तकालयाध्यक्षस्य अनुमत्या एव पुस्तकानि बहिः **नेतव्यानि**। | 3. चित्राणि न **दूषयितव्यानि**। |
| 4. समाचारपत्रं पत्राधानिकायाम् एव **पठनीयम्**। | 4. अनुमतिं विना पुस्तकानि बहिः न **नेतव्यानि**। |

❖ **उपरिलिखितेषु निर्देशेषु रेखाङ्कितपदानां प्रकृतिप्रत्ययविभागं जानीत –**

| प्रकृतिः (धातुः) | + | प्रत्ययः | = | प्रत्ययुक्तपदम् |
|---|---|---|---|---|
| पाल् | + | अनीयर् | = | पालनीय – पालनीयम् |
| त्यज् | + | तव्यत् | = | त्यक्तव्य – त्यक्तव्यानि |

| | | | | |
|---|---|---|---|---|
| नी | + | तव्यत् | = | नेतव्य – नेतव्यानि |
| पठ् | + | अनीयर् | = | पठनीय – पठनीयम् |
| कृ | + | तव्यत् | = | कर्त्तव्य – कर्त्तव्य: |
| लिख् | + | अनीयर् | = | लेखनीय – लेखनीयम् |
| दूष् | + | तव्यत् | = | दूषयितव्य – दूषयितव्यानि |

**अवधातव्यम् –**

- तव्यदनीयर् – प्रत्यययो: प्रयोग: विधिलिङ्लकारार्थे कर्मवाच्ये भाववाच्ये वा भवति।
- तव्यत् प्रत्ययस्य 'तव्य' अनीयर् प्रत्ययस्य च 'अनीय' अवशिष्यते।

**यथा –**

| | | | | | | | पुंलिङ्गम् | स्त्रीलिङ्गम् | नपुंसकलिङ्गम् |
|---|---|---|---|---|---|---|---|---|---|
| पठ् | + | तव्यत् | = | पठितव्य | = | | पठितव्य: | पठितव्या | पठितव्यम् |
| पठ् | + | अनीयर् | = | पठनीय | = | | पठनीय: | पठनीया | पठनीयम् |

- कर्मवाच्ये कर्तृपदं तृतीयाविभक्तौ, कर्मपदं च प्रथमाविभक्तौ भवत:।
- तव्यदनीयर् – प्रत्ययान्तपदं कर्मपदानुसारमेव प्रथमाविभक्तौ भवति।
- भाववाच्ये तु कर्मपदं न भवति अत: तव्यदनीयर् – प्रत्ययान्तपदं सदा नपुंसकलिङ्गे प्रथमाविभक्तौ एकवचने एव भवति।
- तव्यदनीयर् – प्रत्ययस्य प्रयोग: विशेषणरूपेण अपि भवति।

❖ **अधोलिखितेषु वाक्येषु रेखाङ्कितपदानां प्रकृति-प्रत्ययौ पृथक् कृत्वा लिखत –**

| वाक्यम् | तृतीयान्तकर्तृपदम् | प्रथमान्तकर्मपदम् |
|---|---|---|
| यथा – बालकै: प्रात: दुग्धं **पातव्यम्**। | बालकै: | दुग्धम् |
| 1. त्वया असत्यं न **वक्तव्यम्**। | ...................... | ...................... |
| 2. तेन लेख: **लेखितव्य:**। | ...................... | ...................... |
| 3. अस्माभि: पुस्तकानि **पठितव्यानि**। | ...................... | ...................... |
| 4. युवाभ्यां यथाशक्ति प्रयत्न: **कर्तव्य:**। | ...................... | ...................... |
| 5. छात्रै: देशस्य रक्षा **करणीया**। | ...................... | ...................... |
| 6. जनै: सौन्दर्यमयी सृष्टि: **रक्षितव्या**। | ...................... | ...................... |
| 7. मया परहिताय सर्वस्वं **त्यक्तव्यम्**। | ...................... | ...................... |
| 8. युष्माभि: प्रशस्त: मार्ग: एव **अनुसरणीय:**। | ...................... | ...................... |

❖ विधिलिङ् –क्रियापदस्य स्थाने 'तव्यत्' प्रत्ययस्य प्रयोगं कृत्वा पुनः वाक्यानि लेखनीयानि –

| | | | |
|---|---|---|---|
| **यथा** – पीयूषः पाठं पठेत्। | पीयूषेण | पाठः | पठितव्यः। |
| 1. विजया भोजनं कुर्यात्। | .................... | .................... | .................... |
| 2. सः गुरुं नमेत्। | .................... | .................... | .................... |
| 3. बालिकाः उद्याने क्रीडेयुः। | .................... | .................... | .................... |
| 4. जनाः प्रधानमन्त्रिकोषे धनं यच्छेयुः। | .................... | .................... | .................... |
| 5. वयं पुस्तकानि पठेम। | .................... | .................... | .................... |
| 6. यूयं समाचारपत्राणि पश्येत। | .................... | .................... | .................... |

❖ अधोलिखितानि वाक्यानि पठत अवगच्छत च –

| | |
|---|---|
| 1. बालकैः जन्तुशाला द्रष्टव्या। | बालकैः जन्तुशाला दर्शनीया। |
| 2. त्वया पाठः स्मर्तव्यः। | त्वया पाठः स्मरणीयः। |
| 3. मया पत्रं लेखितव्यम्। | मया पत्रं लेखनीयम्। |

अत्र किम् अवगतम्?

**अत्र अवगतं यत् 'तव्यत्' इति प्रत्ययस्य स्थाने 'अनीयर्' 'प्रत्ययस्य अपि प्रयोगः भवितुं शक्यते।'**

❖ अधः वाक्येषु तव्यत्-अनीयर्-प्रत्ययौ प्रयुज्य पुनः वाक्यानि लिखत –

उदाहरणम्

सः अत्र प्रवेशं न कुर्यात्।

(क) तव्यत् – तेन अत्र प्रवेशः न कर्तव्यः।

(ख) अनीयर् – तेन अत्र प्रवेशः न करणीयः।

1. दर्शकाः पशून् न पीडयेयुः।

   (क) तव्यत् – ..............................................................

   (ख) अनीयर् – ..............................................................

2. पथिकः बसयानात् हस्तं बहिः न कुर्यात्?

   (क) तव्यत् – ..............................................................

   (ख) अनीयर् – ..............................................................

3. गोविन्दः ग्रन्थालये ग्रन्थम् उच्चैः न पठेत्।

   (क) तव्यत् – ..............................................................

   (ख) अनीयर् – ..............................................................

❖ **अधोलिखितेषु वाक्येषु तव्यत् – प्रत्ययस्य स्थाने अनीयर् – प्रत्ययस्य प्रयोगः करणीयः –**

| | | | |
|---|---|---|---|
| **यथा** – छात्रैः पाठः पठितव्यः। | छात्रैः | पाठः | पठनीयः। |
| 1. मालाकारेण पुष्पाणि चेतव्यानि। | ..................... | ..................... | ..................... |
| 2. कथाकारेण कथा कथयितव्या। | ..................... | ..................... | ..................... |
| 3. अस्माभिः गुरवः सदा पूजयितव्याः। | ..................... | ..................... | ..................... |
| 4. त्वया कुमार्गः त्यक्तव्यः। | ..................... | ..................... | ..................... |
| 5. सर्वैः महापुरुषाणां चरितानि स्मर्तव्यानि। | ..................... | ..................... | ..................... |

❖ **अनीयर् – प्रत्ययस्य स्थाने तव्यत् – प्रत्ययस्य प्रयोगः करणीयः –**

| | | | |
|---|---|---|---|
| **यथा** – प्रातः उद्याने भ्रमणीयम्। | प्रातः | उद्याने | भ्रमितव्यम्। |
| 1. नृपेण प्रजाः पालनीयाः। | ..................... | ..................... | .....................। |
| 2. त्वया धर्मग्रन्थाः श्रवणीयाः। | ..................... | ..................... | .....................। |
| 3. अस्माभिः अपरेषां गुणाः एव अनुकरणीयाः। | ..................... | ..................... | .....................। |
| 4. कृषकैः पशवः स्नेहेन रक्षणीयाः। | ..................... | ..................... | .....................। |
| 5. छात्रैः प्रातः उत्थाय ईशः स्मरणीयः। | ..................... | ..................... | .....................। |

❖ **अधोलिखितेषु वाक्येषु कोष्ठकनिर्दिष्टैः उचितपदैः रिक्तस्थानानि पूरयत –**

| | |
|---|---|
| 1. बालिकाभिः राष्ट्रगीतं .....................। | (गै + तव्यत् ) |
| 2. छात्रैः उपदेशाः .....................। | (पाल् + अनीयर्) |
| 3. युष्माभिः शुद्धं जलं .....................। | (पा + अनीयर्) |
| 4. मुनिभिः तपः .....................। | (कृ + अनीयर्) |
| 5. न्यायधीशेन न्यायः .....................। | (कृ + अनीयर्) |
| 6. भवत्या पाठः .....................। | (लिख् + अनीयर्) |
| 7. विद्वद्भिः कविताः .....................। | (रच् + अनीयर्) |
| 8. अस्माभिः श्लोकाः .....................। | (पठ् + तव्यत्) |
| 9. पत्रवाहकेन पत्राणि .....................। | (आ + नी+ तव्यत्) |
| 10. राज्ञा प्रजाः .....................। | (पाल् + तव्यत्) |
| 11. माता-पितृभ्यां पुत्राः पुत्र्यः च .....................। | (पठ् (णिच्) + अनीयर्) |
| 12. कृषकैः पशवः स्नेहेन .....................। | (रक्ष् + अनीयर्) |

## विशेषणरूपेण प्रयोगः

यथा – अहो! कीदृशं रमणीयम् उद्यानम्।

अहो! एषा द्रष्टव्या नगरी।

❖ 'क' स्तम्भे विशेषणानि 'ख' स्तम्भे विशेष्यानि सन्ति तेषां उचितमेलनं कुरुत –

| | 'क' स्तम्भः | | 'ख' स्तम्भः |
|---|---|---|---|
| 1. | रमणीया | (क) | पुष्पाणि |
| 2. | आचरणीयम् | (ख) | अश्वानाम् |
| 3. | पालनीयानाम् | (ग) | गीतम् |
| 4. | उल्लेखनीयायाः | (घ) | माता |
| 5. | दर्शनीयेषु | (ङ) | सृष्टिः |
| 6. | चयनीयानि | (च) | पुस्तकाभ्याम् |
| 7. | पूजनीया | (छ) | पर्यटनस्थलेषु |
| 8. | रक्षणीयायै | (ज) | कर्म |
| 9. | श्रवणीयम् | (झ) | कथायाः |
| 10. | पठनीयाभ्याम् | (ञ) | मातृभूम्यै |

## शतृ-प्रत्ययः

❖ इदानीं पुनरावृत्तिं कुर्मः। भवद्भिः नवमकक्षायां शतृप्रत्ययस्य विषये पठितम् –

**1. उदाहरणम् अनुसृत्य शतृ-प्रत्ययान्तपदैः वाक्यं योजयत –**

(क) बालकः पठति। बालकः लिखति।

पठन् बालकः लिखति।

(ख) बालिका पठति। बालिका लिखति।

पठन्ती बालिका लिखति।

(ग) शिक्षकः शिक्षयति। शिक्षकः फलं दर्शयति।

शिक्षयन् शिक्षकः फलं दर्शयति।

(घ) शिक्षिका शिक्षयति। शिक्षिका फलं दर्शयति।

...................... शिक्षिका फलं दर्शयति।

(ङ) बालकः धावति। बालकः हसति।

...................... बालकः हसति।

(च) बालिका धावति। बालिका हसति।

..................... बालिका हसति।

(छ) गौरव: गच्छति। गौरव: आचार्यं नमति।

..................... गौरव: आचार्यं नमति।

(ज) राधिका गच्छति। राधिका आचार्यं नमति।

..................... राधिका आचार्यं नमति।

| धातु: | पुंलिङ्गम् | स्त्रीलिङ्गम् | नपुंसकलिङ्गम् |
|---|---|---|---|
| पठ् | पठन् | पठन्ती | पठत् |
| शिक्ष् | शिक्षयन् | शिक्षयन्ती | शिक्षयत् |
| धाव् | धावन् | धावन्ती | धावत् |
| गम् | गच्छन् | गच्छन्ती | गच्छत् |
| हस् | हसन् | हसन्ती | हसत् |

संस्कृतभाषायाम् उपरि वाक्येषु प्रयुक्ता: धातव: 'परस्मैपदिन:' मन्यन्ते। एतै: सह शतृप्रत्ययस्य प्रयोग: क्रियते। एवम् एव संस्कृतभाषायां धातूनाम् अन्य: वर्ग: अपि भवति यस्मिन् लभ्-सेव्-वृध्-सह्-यत्-इत्यादय: धातव: भवन्ति। एष: वर्ग: 'आत्मनेपदी' इति कथ्यते।

**यथा**–परस्मैपदि-धातुभि: सह शतृ-प्रत्ययस्य प्रयोग: भवति तथैव अस्मिन् एव अर्थे आत्मनेपदिधातुभि: सह शानच्-प्रत्ययस्य प्रयोग: भवति।

## शानच् प्रत्यय:

| धातु: | पुंलिङ्गम् | स्त्रीलिङ्गम् | नपुंसकलिङ्गम् |
|---|---|---|---|
| सेव् | सेवमान: | सेवमाना | सेवमानम् |
| लभ् | लभमान: | लभमाना | लभमानम् |
| सह् | सहमान: | सहमाना | सहमानम् |
| वृध् | वर्धमान: | वर्धमाना | वर्धमानम् |
| यत् | यतमान: | यतमाना | यतमानम् |

➔ एतेषां रूपाणि क्रमश: देववत्, लतावत्, फलवत् भवन्ति।

❖ अधोलिखितम् उदाहरणम् अनुसृत्य त्रिषु लिङ्गेषु 'शानच्' प्रत्ययान्त-रूपाणि लिखत –

| | धातुः | पुल्लिङ्गम् | स्त्रीलिङ्गम् | नपुंसकलिङ्गम् |
|---|---|---|---|---|
| यथा – | प्र+यत् | प्रयतमानः | प्रयतमाना | प्रयतमानम् |
| 1. | कम्प् | ..................... | ..................... | ..................... |
| 2. | वन्द् | ..................... | ..................... | ..................... |
| 3. | सेव् | ..................... | ..................... | ..................... |
| 4. | प्र+काश् | ..................... | ..................... | ..................... |
| 5. | मुद् (मोद्) | ..................... | ..................... | ..................... |

❖ कोष्ठके दत्तानां धातूनां शानच्-प्रत्ययान्त-रूपेण रिक्तस्थानानि पूरयत –

यथा – **वन्दमानः** स आशिषं लभते। (वन्द्)

1. शनैः ..................... सा वैभवं प्राप्नोति। (वृध् / वर्ध् )
2. ..................... नक्षत्रैः आकाशः दीव्यति। (प्र + काश्)
3. कष्टानि ..................... वीराः कीर्तिं लभन्ते। (सह्)
4. ..................... वृक्षेभ्यः पुष्पाणि पतन्ति। (कम्प्)
5. ..................... जनाः साफल्यम् आप्नुवन्ति। (प्र+यत् )

❖ उदाहरणम् अनुसृत्य शानच्-प्रयोगेन वाक्यद्वयस्य स्थाने वाक्यम् एकं रचयत –

यथा – छात्रः दीनान् **सेवते**। छात्रः मोदते। दीनान् **सेवमानः** छात्रः मोदते।

1. लताः **कम्पन्ते**। लताभ्यः पुष्पाणि पतन्ति। ..................... लताभ्यः पुष्पाणि पतन्ति।
2. कमलानि जले **जायन्ते**। कमलेभ्यः परागः पतति। जले ..................... कमलेभ्यः परागः पतति।
3. ते **मोदन्ते**। ते गायन्ति। ..................... ते गायन्ति।
4. सैनिकाः **युध्यन्ते**। सैनिकाः देशं रक्षन्ति। ..................... सैनिकाः देशं रक्षन्ति।
5. दिलीपः गां **सेवते**। दिलीपः सिहं पश्यति। गां ..................... दिलीपः सिहं पश्यति।
6. बालिका चित्रम् **ईक्षते**। सा प्रसन्ना भवति। चित्रं ..................... बालिका प्रसन्ना भवति।
7. छात्रः पुरस्कारं **लभते**। छात्रः प्रसन्नः भवति। पुरस्कारं ..................... छात्रः प्रसन्नः भवति।
8. पुत्रः मातापितरौ **सेवते**। सः स्वकर्तव्यं निर्वहति। मातापितरौ ..................... पुत्रः स्वकर्तव्यं निर्वहति।

## ध्यातव्यम्

शानच्-प्रत्ययान्त-पदानां प्रयोगः विशेषणरूपेण भवति। अतः विशेषणस्य लिङ्ग-विभक्ति-वचनानि तु सर्वदा विशेष्य-पदानुसारं भवन्ति।

❖ अधोलिखितानां विशेषणपदानां समुचितविशेष्यपदैः सह मेलनं कुरुत –

| | | | | |
|---|---|---|---|---|
| 1. | वर्धमानः | (क) वृक्षात् | यथा वर्धमानः | बालः |
| 2. | प्रार्थयमानम् | (ख) बालः | ...................... | ...................... |
| 3. | वन्दमानया | (ग) भक्तम् | ...................... | ...................... |
| 4. | सेवमानाय | (घ) बालिकया | ...................... | ...................... |
| 5. | कम्पमानात् | (ङ) छात्राय | ...................... | ...................... |

## ( ख ) तद्धितप्रत्ययाः

### मतुप् प्रयोगः

**तद्धितप्रत्ययाः संज्ञाशब्दैः सह प्रयुक्ताः भवन्ति।**

❖ अधोलिखितानि वाक्यानि पठत स्थूलाक्षराणि पदानि च समक्षं लिखत –

1. **शक्तिमान्** जनः रक्षति सर्वम्। ..............................
2. **बुद्धिमान्** नरः विचारशीलः भवति। ..............................
3. **गुणवान्** जनः यशः प्राप्नोति। ..............................
4. **धनवान्** नरः दानेन शोभते। ..............................
5. **श्रद्धावान्** छात्रः लभते ज्ञानम्। ..............................

❖ किं भवन्तः उपर्युक्तपदानाम् अर्थं जानन्ति? पश्यन्तु अत्र, उदाहरणं च अनुसृत्य रिक्तस्थानानि पूरयन्तु –

| | पदानि | अर्थः | | | |
|---|---|---|---|---|---|
| 1. | शक्तिमान् | शक्तियुक्तः | शक्तिः | अस्य | अस्ति। |
| 2. | बुद्धिमान् | ..................... | ..................... | ..................... | .....................। |
| 3. | गुणवान् | ..................... | ..................... | ..................... | .....................। |
| 4. | धनवान् | ..................... | धनम् | ..................... | .....................। |
| 5. | श्रद्धावान् | ..................... | ..................... | ..................... | .....................। |

❖ किं जानन्ति यत् एतेषां शब्दानां निर्माणं कथं भवति पश्यन्तु –

| | | | | | |
|---|---|---|---|---|---|
| 1. | शक्ति + मतुप् = | शक्तिमत् | शक्तिमान् | (पुंलिङ्गम्, प्रथमाविभक्तिः, एकवचनम्) |
| 2. | बुद्धि + मतुप् = | बुद्धिमत् | बुद्धिमान् | (पुंलिङ्गम्, प्रथमाविभक्तिः, एकवचनम्) |
| 3. | गुण + मतुप् = | गुणवत् | गुणवान् | (पुंलिङ्गम्, प्रथमाविभक्तिः, एकवचनम्) |

**परं कुत्रचित् 'मत्' दृश्यते, कुत्रचित् च 'वत्' दृश्यते, एतत् कथम्? जानन्तु—**

| | | | | |
|---|---|---|---|---|
| 4. | धन + मतुप् = | धनवत् | धनवान् | (पुंलिङ्गम्, प्रथमाविभक्तिः, एकवचनम्) |
| 5. | श्रद्धा + मतुप् = | श्रद्धावत् | श्रद्धावान् | (पुंलिङ्गम्, प्रथमाविभक्तिः, एकवचनम्) |
| 6. | यशस् + मतुप् = | यशस्वत् | यशस्वान् | (पुंलिङ्गम्, प्रथमाविभक्तिः, एकवचनम्) |

एवं ज्ञायते यत् उपर्युक्तपदानि मतुप्-प्रत्ययेन युक्तानि सन्ति। अकारान्त / आकारान्त, सकारान्त शब्दानां योगे मतुप् (मत्) स्थाने (वत्) भवति।

❖ **अधोलिखितं गद्यांशं पठत –**

पुरा मेवाडराज्ये शक्तिमान् नृपः प्रतापः आसीत्। तस्य नीतिमान् पूर्वमन्त्री भामाशाहः आसीत्। राज्ञः श्रद्धावन्तः सैनिकाः तेन सह वने अवसन्। बुद्धिमान् प्रतापः राज्यस्य रक्षायै पुनः पुनः प्रयत्नम् अकरोत् परं धनाभावे सेनाभावे च असफलः जातः। तदा धनवान् मन्त्री राज्यस्य रक्षायै विपुलं धनम् अयच्छत्। धन्याः एतादृशाः गुणवन्तः जनाः ये देशहिताय सर्वम् अर्पयन्ति।

➔ **अधः प्रदत्तम् उदाहरणम् अनुसृत्य उचितैः विशेषणैः रिक्तस्थानानि पूरयत तेषां प्रकृतिप्रत्यय-विभागमपि कुरुत–**

| | विशेषणानि | प्रकृतिः | + | प्रत्ययः | विशेष्यानि |
|---|---|---|---|---|---|
| 1. | शक्तिमान् | शक्ति | + | मतुप् | नृपः |
| 2. | ...................... | ...................... | + | ...................... | पूर्वमन्त्री |
| 3. | ...................... | ...................... | + | ...................... | सैनिकाः |
| 4. | ...................... | ...................... | + | ...................... | प्रतापः |
| 5. | ...................... | ...................... | + | ...................... | मन्त्री |
| 6. | ...................... | ...................... | + | ...................... | जनाः |

➔ **अत्र वयं पश्यामः यत् मतुप्-प्रत्ययान्तपदानि विशेषणानि भवन्ति।**

❖ **अधोलिखितं संवादं पठित्वा मतुप्-प्रत्ययान्त-विशेषणैः रिक्तस्थानानि पूरयत –**

**अध्यापकः** – ...................... (बुद्धि + मतुप्) छात्राः! संसारेऽस्मिन् कः श्रेष्ठः?

**सुजयः** – आचार्य! यः ...................... (धन + मतुप्), ...................... (रूप + मतुप्) च नरः भवति, जनाः तम् एव श्रेष्ठं मन्यन्ते।

**श्रुतिः** – आचार्य! अहं वदानि, यः ................. (सदाचार + मतुप्), विवेकी, ............. (नीति + मतुप्), ...................... (शक्ति + मतुप्) च भवति सः श्रेष्ठः।

**प्रिया** – आचार्य! अहं चिन्तयामि, ................... (विद्या + मतुप्), ................... (चरित्र + मतुप्) च जनः एव सर्वोत्तमः भवति।

**श्रेष्ठा** – आचार्य! मम पक्षम् अपि शृणोतु। यः सत्यवादी, ...................... (निष्ठा + मतुप्), ...................... (विनय + मतुप्), ...................... (कीर्ति + मतुप्) देशभक्तः च अस्ति स एव श्रेष्ठः।

**अध्यापकः** – सत्यमेतत्, यः .................... (सदाचार + मतुप्), विपत्सु च ................ (धृति + मतुप्) ............... (यशस् + मतुप्) च भवेत् सः देशभक्तः एव समाजे ............. (गुण + मतुप्) श्रेष्ठः च मन्यते। वीराः अभ्युदये ...................... (क्षमा + मतुप्) भवन्ति युधि च ...................... (धैर्य + मतुप्) भवन्ति।

**ध्यातव्यम्**

मतुप्–प्रत्ययः संज्ञाशब्दैः सह प्रयुज्यते।

- **यथा –** शक्ति + मतुप् – शक्तिमान्
  धन + मतुप् – धनवान्
- अयं प्रत्ययः 'युक्तः'/अस्य अस्ति/अस्मिन् अस्ति वा इति अर्थे प्रयुज्यते।
- 'मतुप्' प्रत्ययेन युक्तः शब्दः विशेषणं भवति।
  **यथा –** शक्तिमान् जनः।
- मत् स्थाने वत्

यदा शब्दस्य अन्ते स् अथवा अ/आ/वर्गीय – प्रथमचत्वारः वर्णाः स्युः तदा मत् स्थाने वत् भवति।

**यथा –** रूप+मतुप् – रूपवत्
यशस्+मतुप् – यशस्वत् –
भास्+मतुप् – भास्वत्

एतेषां रूपाणि पुंलिङ्गे भवत् शब्दवत्, स्त्रीलिङ्गे नदीवत् नपुंसकलिङ्गे जगत् शब्दवत् भवन्ति।

| बुद्धिमत् | | | |
|---|---|---|---|
| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| **पुंलिङ्गम्** | बुद्धिमान् | बुद्धिमन्तौ | बुद्धिमन्तः |
| **स्त्रीलिङ्गम्** | बुद्धिमती | बुद्धिमत्यौ | बुद्धिमत्यः |
| **नपुंसकलिङ्गम्** | बुद्धिमत् | बुद्धिमती | बुद्धिमन्ति |

| गुणवत् | | | |
|---|---|---|---|
| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| **पुंलिङ्गम्** | गुणवान् | गुणवन्तौ | गुणवन्तः |
| **स्त्रीलिङ्गम्** | गुणवती | गुणवत्यौ | गुणवत्यः |
| **नपुंसकलिङ्गम्** | गुणवत् | गुणवती | गुणवन्ति |

## णिनि ( इन् )

❖ **अधोलिखितानि वाक्यानि ध्यानेन पठित्वा रेखाङ्कितानि पदानि समक्षं लिखत –**

1. नमन्ति **फलिनो** वृक्षा: । ......................
2. नमन्ति **गुणिनो** जना: । ......................
3. **परिश्रमिण:** बाला: विद्यां लभन्ते। ......................
4. **धनी** जन: दानेन शोभते। ......................
5. श्रीकृष्ण: **योगी** अस्ति। ......................
6. **ज्ञानी** पुरुष: समदर्शी भवति। ......................

❖ **किं भवन्त: एतेषां पदानाम् अर्थं जानन्ति? अत्र पश्यन्तु उदाहरणं च अनुसृत्य तेषाम् अर्थं लिखन्तु –**

| | | | | | |
|---|---|---|---|---|---|
| फलिन: | = | फलयुक्ता: | गुणिन: | = | ...................... |
| परिश्रमिण: | = | ...................... | योगी | = | ...................... |
| धनी | = | धनयुक्त: | ज्ञानी | = | ...................... |

❖ **एतेषाम् अर्थं ज्ञात्वा वयं जानीम: यत् एतानि पदानि विशेषणपदानि सन्ति।**
**अत्र विशेषण-विशेष्यसन्दर्भ: कीदृश: अस्ति इति पश्याम: –**

| | विशेषणम् | विशेष्यम् |
|---|---|---|
| 1. | फलिन: | वृक्षा: |
| 2. | गुणिन: | जना: |
| 3. | परिश्रमिण: | बाला: |
| 4. | धनी | जन: |
| 5. | योगी | श्रीकृष्ण: |
| 6. | ज्ञानी | पुरुष: |

❖ **किं वचनदृष्ट्या एतेषु पदेषु कोऽपि भेद: अस्ति? पश्यन्तु –**

1, 2, 3–क्रमाङ्कपदानि बहुवचने सन्ति।

4, 5, 6–क्रमाङ्कपदानि एकवचने सन्ति।

❖ **किं ज्ञायते उपर्युक्तस्थूलपदेषु क: प्रत्यय? –**

तत्र 1 , 2, 3–क्रमाङ्कपदेषु अन्ते 'इन:' दृश्यते।

4, 5, 6–क्रमाङ्कपदेषु अन्ते 'ई' दृश्यते।

**एतेषु 'णिनि' प्रत्यय: एव अस्ति। वचनभेदात् स्वरूपभेद:।**

**यथा – फलिन: ( बहुवचनम् ) धनी ( एकवचनम् )**

❖ **अधोलिखितानाम् पदानां परिचयम् उदाहरणम् अनुसृत्य लिखत –**

| | पदानि | मूलशब्दः | प्रत्ययः | निर्मितशब्दः | लिङ्गम् |
|---|---|---|---|---|---|
| 1. | फलिनः | फल | णिनि | फलिन् | पुं० |
| 2. | गुणिनः | गुण | णिनि | गुणिन् | पुं० |
| 3. | परिश्रमिणः | ...................... | ...................... | ...................... | ...................... |
| 4. | धनी | धन | णिनि | धनिन् | पुं० |
| 5. | योगी | ...................... | ...................... | ...................... | ...................... |
| 6. | ज्ञानी | ...................... | ...................... | ...................... | ...................... |

**अस्माभिः अधीतम्**

1. 'णिनि' प्रत्ययः संज्ञाशब्दात् मतुप्वत् 'युक्तः' इत्यर्थे भवति।
   **यथा** – फलिनः – (फल+णिनि) फलैः युक्ताः अथवा फलानि सन्ति एतेषु इति।
   धनी (धन+णिनि) – धनेन युक्तः अथवा धनम् अस्ति अस्य इति।
2. णिनि – प्रत्यययुक्तानि पदानि विशेषणपदानि सन्ति। अतः एतेषां रूपाणि त्रिषु लिङ्गेषु भवन्ति।

❖ **अधः प्रदत्तशब्दैः सह उदाहरणम् अनुसृत्य 'णिनि' प्रत्ययं योजयित्वा लिखत –**

| | शब्दः+प्रत्ययः | | मूलशब्दः | अर्थः | प्रथमा |
|---|---|---|---|---|---|
| **यथा** – | दण्ड + णिनि | = | दण्डिन् | दण्डयुक्तः | दण्डी |
| 1. | दान + णिनि | = | ...................... | ...................... | ...................... |
| 2. | विवेक + णिनि | = | ...................... | ...................... | ...................... |
| 3. | सुख + णिनि | = | ...................... | ...................... | ...................... |
| 4. | प्राण + णिनि | = | ...................... | ...................... | ...................... |
| 5. | देह + णिनि | = | ...................... | ...................... | ...................... |
| 6. | क्रोध + णिनि | = | ...................... | ...................... | ...................... |

❖ **अधोलिखितां तालिकां पूरयत –**

| | शब्दः+प्रत्ययः | रूपाणि | पुंल्लिङ्गे | स्त्रीलिङ्गे | नपुंसकलिङ्गे |
|---|---|---|---|---|---|
| **यथा** – | उद्योग + णिनि | उद्योगिन् | उद्योगी | उद्योगिनी | उद्योगि |
| 1. | अर्थ + णिनि | .............. | .............. | .............. | .............. |
| 2. | संसार + णिनि | .............. | .............. | .............. | .............. |
| 3. | धन + णिनि | .............. | .............. | .............. | .............. |
| 4. | सुख + णिनि | .............. | .............. | .............. | .............. |
| 5. | मान + णिनि | .............. | .............. | .............. | .............. |

❖ **कोष्ठकात् उचितपदम् आदाय रिक्तस्थानपूर्तिं क्रियताम् –**

| | | |
|---|---|---|
| **यथा** – | अभिमानी मानं न लभते। | (अभिमानी / अभिमानिन:) |
| 1. | .................... सदा सम्मान्या: भवन्ति। | (विज्ञानी / विज्ञानिन:) |
| 2. | .................... शान्तिं न प्राप्नोति। | (लोभिन: / लोभी) |
| 3. | .................... धन्या: लोके। | (दानी / दानिन:) |
| 4. | .................... विवेक: नश्यति। | (क्रोधी / क्रोधिन:) |
| 5. | किं कुलेन विशालेन विद्याहीनस्य .................... ? | (देही / देहिन:) |
| 6. | .................... जन: सर्वप्रिय: भवति। | (विनोदिन: / विनोदी) |
| 7. | सर्वे .................... भवन्तु । | (सुखी / सुखिन:) |
| 8. | .................... इयं बाला। | (व्यवसायी / व्यवसायिनी) |

## मिश्रितप्रश्ना:

❖ **अधोलिखितेषु वाक्येषु स्थूलाक्षरपदेषु प्रकृति-प्रत्ययविभागं कुरुत –**

| | | प्रकृति: | + | प्रत्यय: |
|---|---|---|---|---|
| **यथा** – | **बुद्धिमान्** सर्वत्र पूज्यते। | बुद्धि | + | मतुप् |
| 1. | **बलवती** हि आशा। | .................... | + | .................... |
| 2. | **उद्योगिनं** पुरुषसिंहमुपैति लक्ष्मी:। | .................... | + | .................... |
| 3. | **गुणिषु** गुणा: पूजास्थानं भवन्ति। | .................... | + | .................... |
| 4. | **नीतिमान्** जन: सुष्ठु आचरति। | .................... | + | .................... |

## ठक् ( इक )

❖ **अधः प्रदत्तानि वाक्यानि ध्यानेन पठत रेखाङ्कितानि पदानि तेषां प्रकृति-प्रत्ययविभागं च अवगच्छत –**

1. मनुष्यः **सामाजिकः** प्राणी अस्ति। — समाज + ठक्
2. 'पर्यावरण-रक्षणम्' अस्माकं **नैतिकं** कर्तव्यम् अस्ति। — नीति + ठक्
3. अद्यत्वे **औद्योगिकः** विकासः सर्वत्र दृश्यते। — उद्योग + ठक्
4. विद्यया **लौकिकी** **अलौकिकी** च उन्नतिः भवति। — लोक + ठक्
5. मम गृहे **माङ्गलिकः** कार्यक्रमः सम्पत्स्यते। — मङ्गल + ठक्

❖ **उपरिलिखितेषु वाक्येषु रेखाङ्कितानि पदानि प्रकृतिप्रत्यय-विभागेन सह लिखत –**

| | |
|---|---|
| सामाजिकः | समाज + ठक् |
| ...................... | ...................... |
| ...................... | ...................... |
| ...................... | ...................... |
| ...................... | ...................... |

### चिन्तनीयम्

क. उपरिलिखितेषु वाक्येषु रेखाङ्कितपदानाम् अन्ते कः प्रत्ययः प्रयुक्तः ?

ख. एतेषु पदेषु मूलशब्दः कः अस्ति ?

ग. एतेषां पदानां शब्दस्य प्रथमस्वरे (आदिस्वरे) किं परिवर्तनं दृश्यते ?

घ. एतानि पदानि वाक्ये 'विशेषण' – रूपेण प्रयुक्तानि सन्ति वा 'विशेष्य'-रूपेण।

**एतेषां चिन्तनीयप्रश्नानाम् उत्तराणि अग्रे पश्यामः –**

2. **वयं पश्यामः यत् रेखाङ्कितपदानि एवम्भूतानि सन्ति –**

| (क) | पदानि | मूलशब्दः | प्रत्ययः | शब्दस्य प्रथमस्वरे-वृद्धिः |
|---|---|---|---|---|
| 1. | सामाजिकः (पु.) | समाज | ठक् (इक) | (स्+अ)-अ स्थाने आ = (स ⇨ सा) |
| 2. | नैतिकम् (नपु.) | नीति | ठक् (इक) | (न्+ई) – 'ई' स्थाने 'ऐ' = (नी ⇨ नै) |
| 3. | औद्योगिकः (पु.) | उद्योग | ठक् (इक) | 'उ' स्थाने 'औ' = (उ ⇨ औ) |
| 4. | लौकिकी (स्त्री.) | लोक | ठक् (इक) | (ल्+ओ) – 'ओ' स्थाने 'औ' = (लो ⇨ लौ) |
| 5. | माङ्गलिकः (पु.) | मङ्गल | ठक् (इक) | (म्+अ) – 'अ' स्थाने 'आ' = (म ⇨ मा) |

❖ **स्थूलपदानां स्थितिः वाक्येषु ईदृशी अस्ति –**

वयं तत्र पश्यामः – 1. **सामाजिकः** प्राणी

2. **नैतिकं** कर्तव्यम्

3. **औद्योगिकः** विकासः

4. **लौकिकी** उन्नतिः

5. **माङ्गलिकः** कार्यक्रमः

| अर्थात् | **एतानि स्थूलाक्षरपदानि विशेषणरूपेण प्रयुक्तानि सन्ति।** <br> **अन्यानि पदानि च विशेष्यरूपेण प्रयुक्तानि सन्ति।** |
|---|---|

## अस्माभिः अधीतम्

1) 'ठक्' प्रत्ययस्य स्थाने 'इक' भवति। प्रयोगे तु 'इक' एव दृश्यते। (यथा – समाज + ठक् = सामाजिक)
अत्र इदम् अपि ध्यातव्यं यत् 'ठञ्' प्रत्ययस्य स्थाने अपि 'इक' एव भवति। (दिन + ठञ् = दैनिक)

2) ठक् / ठञ् (इक) प्रत्यये जाते मूलशब्दस्य आदिस्वरस्य वृद्धिः भवति। 'आ' 'ऐ' 'औ' त्रयः वृद्धिस्वराः सन्ति। ते क्रमशः –

| | | |
|---|---|---|
| अ, आ | ⇨ | आ |
| इ, ई, ए, ऐ | ⇨ | ए ऐ |
| उ, ऊ, ओ, औ | ⇨ | ओ औ |
| ऋ, ॠ | ⇨ | आर् (कृतिका + इक = कार्तिक) |

3) 'ठक्' प्रत्ययान्तं पदं विशेषणपदं भवति। अतः अस्य पदस्य विशेष्यपदानुसारं लिङ्गवचन-विभक्तयश्च भवन्ति।

4) एतेषां रूपाणि पुंलिङ्गे बालकवत् स्त्रीलिङ्गे नदीवत् नपुंसकलिङ्गे च फलवत् भवन्ति।

### 3. उदाहरणम् अनुसृत्य ठक्/ठञ् ( इक ) प्रत्ययान्त-पदानि रचयत –

| | मूल शब्दः | | प्रत्ययः ठक्/ठञ् | निर्मितशब्दः | पुं॰ | स्त्री॰ | नपुं॰ |
|---|---|---|---|---|---|---|---|
| यथा – | अर्थ | + | इक | आर्थिक | आर्थिकः | आर्थिकी | आर्थिकम् |
| | धर्म | + | इक | .................... | .................... | .................... | .................... |
| | सप्ताह | + | इक | .................... | .................... | .................... | .................... |
| | सेना | + | इक | .................... | .................... | .................... | .................... |
| | कल्पना | + | इक | .................... | .................... | .................... | .................... |
| | बुद्धि | + | इक | .................... | .................... | .................... | .................... |
| | प्रकृति | + | इक | .................... | .................... | .................... | .................... |
| | देव | + | इक | .................... | .................... | .................... | .................... |
| | इतिहास | + | इक | .................... | .................... | .................... | .................... |

| | | | | | | |
|---|---|---|---|---|---|---|
| साहित्य | + | इक | ........................ | ........................ | ........................ | ........................ |
| वेद | + | इक | ........................ | ........................ | ........................ | ........................ |
| उद्योग | + | इक | ........................ | ........................ | ........................ | ........................ |
| दिन | + | इक | ........................ | ........................ | ........................ | ........................ |
| मास | + | इक | ........................ | ........................ | ........................ | ........................ |
| वर्षा | + | इक | ........................ | ........................ | ........................ | ........................ |

❖ **निम्नलिखितवाक्येषु कोष्ठके प्रदत्तशब्देन ठक् / ठञ् ( इक ) प्रत्ययं प्रयुज्य अस्य उचितरूपेण ( पदेन ) रिक्तस्थानानि पूरयत।**

**यथा – अहं भारतस्य नागरिकः ( नगर + ठक् ) अस्मि।**

1. अत्र ( धर्म + ठक् ) ........................ उत्सवः भवति।
2. अयं ( वेद + ठञ् ) ........................ विद्वान् अस्ति।
3. स ( पुराण + ठक् ) ........................ मङ्गलाचरणं करोति।
4. देहल्याम् अनेकानि ( इतिहास + ठक् ) ........................ स्थानानि सन्ति।
5. भारतस्य ( भूगोल + ठक् ) ........................ स्थितिः विचित्रा अस्ति।
6. सम्प्रति देशस्य ( अर्थ + ठक् ) ........................ स्थितिः सन्तोषप्रदा।
7. ( सप्ताह + ठक् ) ........................ अवकाशः रविवारे भवति।
8. अयं ( कल्पना + ठक् ) ........................ उपन्यासः केन लिखितः
9. मम पुस्तकालये अनेकाः ( साहित्य + ठक् ) ........................ पत्रिकाः आयान्ति।
10. ( उद्योग + ठक् ) ........................ विकासेन पर्यावरणं प्रदूष्यते।
11. ( वर्ष + ठञ् ) ........................ परीक्षायां मया 'पर्यावरणम्' विषयम् अवलम्ब्य निबन्धः लिखितः।
12. ( दिन + ठञ् ) ........................ कार्यं मया सम्पन्नम्।

❖ **अधोलिखितानां विशेष्याणां विशेषणपदानि कोष्ठकात् चित्वा लिखत –**

| | विशेषणपदानि | विशेष्यपदानि | |
|---|---|---|---|
| यथा – | ऐतिहासिकम् | नाटकम् | ( ऐतिहासिकः / ऐतिहासिकम् ) |
| 1. | ........................ | उपदेशः | ( नैतिकः / नैतिकम् ) |
| 2. | ........................ | अभ्यासः | ( प्रायोगिकम् / प्रायोगिकः ) |
| 3. | ........................ | परीक्षा | ( मासिकम् / मासिकी ) |
| 4. | ........................ | निमन्त्रणम् | ( औपचारिकम् / औपचारिकः ) |
| 5. | ........................ | कृतिः | ( मौलिकम् / मौलिकी ) |
| 6. | ........................ | दृश्यम् | ( प्राकृतिकम् / प्राकृतिकः ) |
| 7. | ........................ | विद्यालयः | ( प्राथमिकम् / प्राथमिकः ) |
| 8. | ........................ | विद्या | ( आध्यात्मिकी / आध्यात्मिकम् ) |

## 'तल्' ( ता )

**गायत –**

वाचि **सरसता** हृदि **निर्मलता**
व्यवहारे **सज्जनता।**
भाति सतां प्रकृतौ प्रिय शृणु रे!
रमणीया **मानवता॥**

❖ **उपरिलिखितपद्यात् स्थूलाक्षरपदानि चित्वा लिखत –**

..........................................................................................................................................

..........................................................................................................................................

**ध्यानेन पश्यत –**

- 'तल्' प्रत्ययस्य प्रयोगः संज्ञा-विशेषण-शब्दैः सह क्रियते।
- 'तल्' स्थाने 'ता' प्रयुज्यते।
- 'ता' योगेन निर्मित-शब्दस्य रूपाणि स्त्रीलिङ्गे 'लतावत्' एकवचने एव चलन्ति।
- 'तल्' योगेन 'भाववाचक' संज्ञापदानि निर्मीयन्ते।
- यथा- सुन्दरता, मधुरता, क्रूरता, कोमलता आदयः।

❖ **अधः मञ्जूषायां प्रदत्तैः शब्दैः सह 'तल्'-प्रत्ययं संयोज्य रिक्तस्थानानि पूरयत –**

**यथा – क्रूरता** तु सदैव निन्दनीया एव भवति।

1. अग्नेः ........................ शीतकाले रोचते।
2. ........................ दुःखदायिनी भवति।
3. गृहस्य ........................ आनन्ददायिनी भवति।
4. प्रकृतेः ........................ मनोरमा अस्ति।
5. मनसः ........................ वानरस्य इव भवति।
6. गणितविषये अशोकस्य ........................ प्रशंसनीया वर्तते।

**मञ्जूषा**

| क्रूर, चञ्चल, दक्ष, स्वच्छ, उष्ण, निर्धन, रमणीय। |
|---|

## ‘त्व’ प्रत्ययः ( त्वम् )

**एतानि वाक्यानि पठत –**

1. ग्रीष्मे सूर्यस्य **प्रचण्डत्वम्** (प्रचण्ड+त्व) असह्यं वर्तते।
2. परिश्रमस्य **महत्त्वं** (महत्+त्व) सर्वे जानन्ति।
3. गुरोः **गुरुत्वं** (गुरु+त्व) वर्णयितुं न शक्यते।
4. अस्य पिण्डस्य **घनत्वं** (घन+त्व) मापय।
5. आचार्यशङ्करस्य **विद्वत्त्वं** (विद्वस्+त्व) आश्चर्यजनकम् आसीत्।
6. वानरस्य **चपलत्वं** (चपल+त्व) बालकेभ्यः रोचते।
7. काव्यस्य **मधुरत्वं** (मधुर+त्व) सहृदयाः जानन्ति।
8. सागरस्य **गहनत्वं** (गहन+त्व) मापनीयं न अस्ति।

**सरला –** सुमेधे! किम् ‘त्व’-प्रत्ययस्य प्रयोगः भाववाचक-संज्ञापद-निर्माणाय भवति?

**सुमेधा –** आम्, सरले!

**सरला –** परम् अत्र तु सर्वत्र नपुंसकलिङ्गस्य प्रयोगः अस्ति।

**सुमेधा –** साधु उक्तम्, पश्य –

- ‘त्व’ – प्रत्ययस्य प्रयोगः भाववाचक-संज्ञापदानां निर्माणाय भवति।
- ‘त्व’ – प्रत्ययस्य प्रयोगः संज्ञाविशेषणपदैः सह भवति।
- ‘त्व’ – प्रत्यय-योगेन निर्मिताः शब्दाः नपुंसकलिङ्गे फलशब्दवत् एकवचने एव भवन्ति।

❖ **अधोलिखित-शब्दैः सह ‘त्व’- प्रत्ययं योजयत –**

| | | | | | |
|---|---|---|---|---|---|
| **यथा –** | पृथु | + | त्व | = | पृथुत्वम् |
| 1. | लघु | + | त्व | = | ........................ |
| 2. | मनुष्य | + | त्व | = | ........................ |
| 3. | विशाल | + | त्व | = | ........................ |
| 4. | कवि | + | त्व | = | ........................ |
| 5. | दीन | + | त्व | = | ........................ |
| 6. | क्षत्रिय | + | त्व | = | ........................ |
| 7. | वीर | + | त्व | = | ........................ |
| 8. | शम | + | त्व | = | ........................ |

4. 'त्व'-'तल्'-प्रत्ययान्तानि पदानि मञ्जूषायाः चित्वा यथोचितं रिक्तस्थानानि पूरयत -

यथा - पवनस्य **शीतलताम्** अनुभूय मनः प्रसीदति।

1. विद्यायाः .................... को न जानाति ?
2. कृष्णसुदाम्नोः .................... जगति आदर्शं स्थापयति।
3. दुष्प्रयुक्ता वाणी मनुष्यस्य .................... प्रकटयति।
4. मनसः .................... वशीकरणीयम्।
5. लवस्य .................... अद्भुता आसीत्।

| चञ्चलत्वम्, मित्रता, वीरता, महत्त्वम्, पशुत्वम् |
|---|

5. अधोलिखिताः सूक्तीः पठित्वा 'तल्-त्व-प्रत्ययान्तानि पदानि रेखाङ्कितानि कुरुत -

यथा - ऐश्वर्यस्य विभूषणं **सुजनता**।

1. नः कालस्य अस्ति **बन्धुत्वम्**।
2. अविवेकिता तु अनर्थाय एव भवति।
3. अहो ! बालकस्य ईदृशी निपुणता।
4. न अस्ति अमरत्वं हि कस्यचित् प्राणिनः भुवि।
5. क्षणे क्षणे यत् नवताम् उपैति तदेव रूपं रमणीयतायाः।
6. विद्वत्त्वं च नृपत्वं च नैव तुल्यं कदाचन।
7. उदारता श्रेष्ठः गुणः अस्ति।

## ( ग ) स्त्रीप्रत्ययौ

### टाप् ( आ )

❖ **अधोलिखितानि वाक्यानि ध्यानेन पठत –**

(क) बालः **बाला** च उदयन्तं भास्करं नमतः।

(ख) आचार्यः **आचार्या** च वृक्षान् आरोपयतः।

(ग) शिष्यः **शिष्या** च लताः जलेन सिञ्चतः।

(घ) गायकः **गायिका** च प्रकृतिगीतं गायतः।

(ङ) अहो! अत्र **शोभना** प्रकृतिः शोभनः च उत्सवः।

❖ **उपर्युक्तानि स्थूलाक्षराणि पदानि अधः मञ्जूषायां क्रमेण लिखत –**

(क) बाला (ख) ........................ (ग) ........................

(घ) ........................ (ङ) ........................

**किं यूयं जानीथ ?**

**उपर्युक्तवाक्येषु प्रयुक्तानाम् एतेषां स्थूलाक्षरपदानां लिङ्गदृष्ट्या किं वैशिष्ट्यम्? पश्यत –**

"एतानि पदानि स्त्रीलिङ्गरूपे तत्र प्रयुक्तानि सन्ति"।

**एतेषां पदानाम् अन्ते कः प्रत्ययः दृश्यते ?**

'आ' प्रत्ययः दृश्यते।

**एष 'आ' प्रत्ययः कस्य रूपम् अंशः वा अस्ति ?**

'टाप्' (ट् + आ + प्) प्रत्ययस्य।

टाप् इति स्त्रीप्रत्ययः अस्ति।

**तर्हि 'टाप्' प्रत्ययस्य कदा कीदृशैः शब्दैः च सह योजनं क्रियते ?**

स्त्रीलिङ्गशब्द-निर्माणाय अकारान्त पुंलिङ्गशब्दैः सह 'टाप्' प्रत्ययः योज्यते। 'टाप्' प्रत्ययस्य तु केवलम् 'आ' एव शिष्यते।

**यथा –**

बाल (अकारान्त, पुं.) + टाप् (स्त्रीलिङ्गे) = (बाल) + (ट् + आ + प्) = बाल + आ = बाला (स्त्रीलिङ्गे)

'टाप्' प्रत्ययान्तशब्दानां रूपरचना कीदृशी भवति ?

ईदृशानां शब्दानां रूपरचना 'लता' शब्दवत् भवति।

❖ **वयम् अत्र उपर्युक्तानां स्थूलाक्षरपदानां परिचयं प्राप्नुमः –**

| | पदानि | मूलशब्दः | प्रत्ययः | निर्मितशब्दः | विभक्तिः | वचनम् |
|---|---|---|---|---|---|---|
| | | ( अकारान्तशब्दः ) | | | | |
| (क) | बाला | बाल (ब्+आ+ल्+अ) | टाप् | बाला | प्रथमा | ए० व० |

| | | | | | | |
|---|---|---|---|---|---|---|
| (ख) | आचार्या | आचार्य | टाप् | आचार्या | प्रथमा | ए० व० |
| (ग) | शिष्या | शिष्य | टाप् | शिष्या | प्रथमा | ए० व० |
| (घ) | गायिका | गायक | टाप् | गायिका | प्रथमा | ए० व० |
| (ङ) | शोभना | शोभन | टाप् | शोभना | प्रथमा | ए० व० |

❖ **अतः अस्माभिः ज्ञातम् –**

- 'टाप्' स्त्रीप्रत्ययः अस्ति। प्रयोगे तु अस्य 'आ' एव शिष्यते।
- एषः प्रत्ययः स्त्रीलिङ्गशब्दनिर्माणाय अकारान्त – पुंलिङ्गशब्दैः सह प्रयुज्यते। यथा–
  बाल +टाप् =बाल+आ = 'बाला' आदयः।
- 'अक' भागान्तशब्देषु 'क' वर्णात् पूर्वम् अकारस्थाने 'इ' भवति।
  यथा–गायक – (ग+आ+य्+अ+क) + टाप् = 'गायिका' आदयः।
- टाप् प्रत्ययान्तशब्दानां रूपाणि 'लतावत्' भवन्ति।

❖ **उदाहरणम् अनुसृत्य स्त्रीलिङ्गशब्दान् रचयत –**

| | शब्दाः | | प्रत्ययः | निर्मितस्त्रीलिङ्गशब्दाः |
|---|---|---|---|---|
| यथा – | अज | + | टाप् | अजा |
| (i) | एडक | + | टाप् | ...................... |
| (ii) | अश्व | + | टाप् | ...................... |
| (iii) | कोकिल | + | टाप् | ...................... |
| (iv) | चटक | + | टाप् | ...................... |
| (v) | छात्र | + | टाप् | ...................... |
| (vi) | प्रिय | + | टाप् | ...................... |
| (vii) | बालक | + | टाप् | बालिका |
| (viii) | सेवक | + | टाप् | ...................... |
| (ix) | नायक | + | टाप् | ...................... |
| (x) | मूषक | + | टाप् | ...................... |

❖ **अधोलिखितेषु वाक्येषु निर्दिष्टशब्दैः सह टाप् – प्रत्ययं प्रयुज्य वाक्यानि पूरयत –**

**यथा** – प्रभा पठने **प्रवीणा** (प्रवीण + टाप्) अस्ति।

(i) अस्याः ...................... (अनुज + टाप्) दीपिका अस्ति।

(ii) दीपिका क्रीडायां ...................... (कुशल + टाप्) अस्ति।

(iii) प्रभा–दीपिकयोः माता ...................... (चिकित्सक + टाप्) अस्ति।

(iv) सा समाजस्य ...................... (सेवक + टाप्) अपि अस्ति।

(v) सा तु स्वभावेन अतीव ...................... (सरल + टाप्) अस्ति।

❖ **अधोलिखितेषु वाक्येषु स्थूलाक्षरपदानां मूलशब्दं प्रत्ययं च पृथक्कृत्य लिखत –**

| | | मूलशब्दः + प्रत्ययः |
|---|---|---|
| **यथा** – | आगता पर्वसु **प्रिया** दीपावलिः। | प्रिय+टाप् |
| (i) | विपणीनां शोभा **अनुपमा** भविष्यति। | ............ + ............ |
| (ii) | रात्रिः दीपानां प्रकाशेन **उज्ज्वला** भविष्यति। | ............ + ............ |
| (iii) | पूजनेन **प्रसन्ना** लक्ष्मीः कृपां करिष्यति। | ............ + ............ |
| (iv) | 'भवतु **शुभदा** दीपावलिः' इति परस्परं कामयन्ते जनाः। | ............ + ............ |
| (v) | **धन्या** इयं दीपावलिः प्रकाशपुञ्जरूपा। | ............ + ............ |

❖ **अधोलिखितेषु वाक्येषु 'टाप्' – प्रत्ययान्तानि पदानि चित्वा समक्षं मञ्जूषायां लिखत –**

(i) अमृतजला इयं गङ्गा पवित्रा।
(ii) कथं नु एतस्याः शोभा विचित्रा!
(iii) सवेगं वहन्ती खलु शोभमाना।
(iv) वन्द्या सदा सा भुवि राजमाना।
(v) भक्तैः सदा तु चिरं सेवमाना।
(vi) भागीरथी भवतु मे पूर्णकामा।

**मञ्जूषा**

| | | | |
|---|---|---|---|
| (i) | अमृतजला | (ii) | ............................... |
| (iii) | ............................... | (iv) | ............................... |
| (v) | ............................... | (vi) | ............................... |
| (vii) | ............................... | (viii) | ............................... |

## ङीप् ( ई )

❖ **अधोलिखितानि वाक्यानि ध्यानपूर्वकं पठत –**

(क) पुण्यजला गङ्गा **नदी**।
(ख) जीवन-**दात्री** प्रकृतिः रक्षणीया सदा।
(ग) **उपकारिणी** वृत्तिः भवति खलु सज्जनानाम्।
(घ) **लौकिकी** उन्नतिः यशः वर्धयति।
(ङ) **यादृशी** भावना सिद्धिः भवति **तादृशी**।

**उपर्युक्तस्थूलाक्षरपदानि अधः मञ्जूषायां लिखत –**

| **यथा** | | | |
|---|---|---|---|
| | (क) नदी | (ख) ....................... | (ग) ....................... |
| | (घ) ....................... | (ङ) (1) ....................... | (2) ....................... |

❖ **उपर्युक्तानि पदानि कस्य लिङ्गस्य रूपाणि सन्ति? तत्पश्यत –**

एतानि पदानि तु 'स्त्रीलिङ्गस्य' एव रूपाणि सन्ति।

**कथं ज्ञायते यत् एतानि पदानि स्त्रीलिङ्गस्य रूपाणि सन्ति?**

यतः एतेषाम् पदानाम् अन्ते 'ई' प्रत्ययः दृश्यते।

**किम् 'ई' एव स्त्रीप्रत्ययः?**

नहि, 'ङीप्' (ङ् + ई + प्) स्त्रीप्रत्ययः।

'ङीप्' – प्रत्यये तु 'ई' एव शिष्यते। अतः 'ई' ङीप् प्रत्ययस्य एव रूपम्।

**तर्हि 'ङीप्' – प्रत्ययस्य कदा प्रयोगः क्रियते ?**

स्त्रीलिङ्गशब्दनिर्माणाय एव ङीप्-प्रत्ययस्य प्रयोगः क्रियते।

**यथा** – नद + ङीप् = 'नदी' ईकारान्तस्त्रीलिङ्गशब्दः भवति।

'ङीप्' प्रत्ययान्तशब्दानां रूपरचना कीदृशी भवति?

ईदृशानां शब्दानां रूपरचना 'नदी' शब्दवत् भवति।

❖ **अत्र वयम् उपर्युक्तानां स्थूलपदानां परिचयं प्राप्नुमः –**

| | पदानि | मूलशब्दः | प्रत्ययः | निर्मितशब्दः | विभक्तिः | वचनम् |
|---|---|---|---|---|---|---|
| (क) | नदी | नद | ङीप् | नदी | प्रथमा | ए.व. |
| (ख) | दात्री | दातृ | .............. | .............. | .............. | .............. |
| (ग) | उपकारिणी | उपकारिन् | .............. | .............. | .............. | .............. |
| (घ) | लौकिकी | लौकिक | .............. | .............. | .............. | .............. |
| (ङ) (1) | यादृशी | यादृश | .............. | .............. | .............. | .............. |
| (2) | तादृशी | तादृश | .............. | .............. | .............. | .............. |

❖ **अतः वयं जानीमः**

- ङीप् स्त्रीप्रत्ययः अस्ति। प्रयोगदशायाम् अस्य 'ई' एव अवशिष्यते।
- स्त्रीलिङ्गशब्दनिर्माणाय 'ङीप्' प्रत्ययः प्रयुज्यते। यथा लौकिक + ङीप् = लौकिकी।
- ङीप् प्रत्ययान्तशब्दानां रूपाणि 'नदी' शब्दवत् भवन्ति।

❖ **उदाहरणम् अनुसृत्य ईकारान्तस्त्रीलिङ्गशब्दान् रचयत –**

| | शब्दाः + प्रत्ययः | निर्मितस्त्रीलिङ्गशब्दाः |
|---|---|---|
| **यथा** – | देव + ङीप् | देवी |
| (i) | तरुण + ङीप् | .................................... |
| (ii) | कुमार + ङीप् | .................................... |
| (iii) | त्रिलोक + ङीप् | .................................... |

(iv) किशोर + ङीप् ..................................

(v) कर्तृ + ङीप् कर्त्री

(vi) जनयितृ + ङीप् ..................................

(vii) मनोहारिन् + ङीप् मनोहारिणी

(viii) मालिन् + ङीप् ..................................

(ix) तपस्विन् + ङीप् ..................................

(x) भवत् + ङीप् भवती

(xi) श्रीमत् + ङीप् ..................................

(xii) गच्छत् (गम् + शतृ) + ङीप् ..................................

(xiii) पचत् (पच् + शतृ) + ङीप् ..................................

(xiv) नृत्यत् (नृत् + शतृ) + ङीप् ..................................

(xv) पश्यत् (दृश् + शतृ) + ङीप् ..................................

(xvi) वदत् (वद् + शतृ) + ङीप् ..................................

(xvii) पृच्छत् (प्रच्छ् + शतृ) + ङीप् ..................................

(xviii) स्पृशत् (स्पृश् + शतृ) + ङीप् ..................................

**ध्यातव्यम् –** यदा शतृप्रत्ययान्तशब्दैः सह ङीप् प्रत्ययः योज्यते तदा अन्तिम 'त्' वर्णात् पूर्वं 'न्' इति वर्णस्य आगमः भवति। यथा – गम् + शतृ = गच्छत् + ङीप् = गच्छ + न् + त् + ई = गच्छन्ती

❖ **अधोलिखितेषु वाक्येषु निर्दिष्टशब्दैः सह 'ङीप्' प्रत्ययं प्रयुज्य वाक्यानि पूरयत –**

**यथा –** श्रीमती (श्रीमत् + ङीप्) हेमा नाट्योत्सवे दीपं प्रज्वालयति।

(i) (कुमार + ङीप्) ........................ वन्दना पुष्पगुच्छैः तस्याः स्वागतं करोति।

(ii) एका (किशोर + ङीप्) ........................ भरतनाट्यं प्रस्तौति।

(iii) तया सह (नृत्यत् + ङीप्) ........................ देविका अस्ति।

(iv) मञ्चे (गायत् + ङीप्) ........................ सुधा अस्ति।

(v) (मनोहारिन् + ङीप्) ........................ एषा नाट्यप्रस्तुतिः।

❖ **अधोलिखितेषु वाक्येषु स्थूलाक्षरपदेषु मूलशब्दं स्त्रीप्रत्ययं च पृथक्कृत्य लिखत –**

**यथा–** **हसन्ती** विभा स्वसखीम् अमिलत्। हसत् + ङीप्

(i) तदैव एका **तरुणी** विभाम् अपृच्छत्। ............ + ............

(ii) किम् इयम् तव सखी **कुमारी** भावना अस्ति? ............ + ............

(iii) अहो! **एतादृशीं** सखीं प्राप्य त्वं धन्या असि। ............ + ............

(iv) तया बसयानात् **पतन्ती** बाला रक्षिता। ............ + ............

## मिश्रितप्रश्नाः

❖ अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा लिखत –

1. **शीतल + टाप्** .................... छाया घर्मकाले परमोपकारिका भवति।
2. **मधुरभाषिन् + ङीप्** .................... वाणी सर्वान् प्रह्लादयति।
3. बोधिसत्त्वः **वृद्धोपसेवा + णिनि** .................... आसीत्।
4. राजा दानशालासु **विचरन्** .................... + .................... अर्थिनां विरलसङ्ख्यां दृष्ट्वा निराशः जातः।
5. राज्ञः **दानशीलताम्** .................... + .................... आकर्ण्य जनाः तत्र आयान्ति स्म।
6. नेत्राभ्यां लोकयात्रा **निर्बाध + टाप्** .................... भवति।
7. **रम् + अनीयर्** .................... हि सृष्टिरेषा।
8. तत्र **हंसी** .................... + .................... राजहंसेन सह विहरति।
9. बकः हंसम् आक्षिपति – किं ते **महत्त्वम्** .................... + .................... इति।
10. एकः मेषः **जिह्वालोलुप + तल्** .................... महानसं प्रविश्य यत् पश्यति तद् भक्षयति स्म।
11. जीवितं **वाञ्छ् + शतृ** .................... नरः कलहयुक्तं गृहं दूरतः परिवर्जयेत्।
12. मेषः **निकटस्थ + टाप्** .................... अश्वशालां प्रविशति।
13. मेषस्य क्षितौ **प्रलुठतः** .................... + .................... तृणेषु वह्निज्वालाः समुत्थिताः।
14. **सुख + णिनि** .................... नरः कामक्रोधोद्भवं वेगं सोढुं शक्नोति।
15. न जानाति भवान् द्रौणेः **चपल + टाप्** .................... प्रकृतिम्।
16. द्रौपदी आत्मानं **मन्दभाग्या** .................... + .................... मनुते।
17. ब्रह्मास्त्रं मानवेषु न **प्रयोक्तव्यम्** .................... + .................... इति द्रोणाचार्यः पुत्रं सावधानम् अकरोत्।
18. दुष्टबुद्धिः प्रच्छन्नभाग्यश्च गर्तसङ्कुले मार्गे **व्रज् + शतृ** .................... आस्ताम्।
19. प्रच्छन्नभाग्यस्य पत्नी **बुद्धि + मतुप्** .................... आसीत्।
20. सा परद्रव्ये **अनासक्ता** .................... + .................... अस्ति।
21. सः भयङ्करं विषधरं फूत्कारं **कुर्वन्तं** .................... + .................... पश्यति।
22. दम्पती प्रचुरमाणिक्यानाम् आभया **भास् + शानच्** .................... निजगृहम् अपश्यताम्।
23. **अवक्रता** .................... + .................... चित्ते वाचि च उभयत्र भवेत्।
24. लोकेऽस्मिन् विद्वांसः **चक्षुस् + मतुप्** .................... प्रकीर्तिताः।
25. **धैर्यवान्** .................... + .................... मन्त्री अकातरः अपि भवेत्।
26. अरुणाचलप्रदेशः सप्तराज्येषु **विभासमानः** .................... + .................... वर्तते।
27. तत्र **लोहिताख्य + टाप्** .................... नदी वहति।
28. ईटा प्रधाना **पुरी** .................... + .................... अस्ति।

29. **पर्यटनाधिकारी** ...................... + ...................... मञ्चे तिष्ठति।

30. अरुणाचले **विपुल + टाप्** ...................... वनसम्पदा वर्तते।

31. ओरिया इति पर्वणि **समाज + ठक्** ...................... कार्यं क्रियते।

32. छात्राः अरुणाचलप्रदेशस्य **ऐतिहासिकानां** ...................... + ...................... स्थलानां विषये ज्ञातुम् इच्छन्ति।

33. तवाङ्ग इति बौद्धभिक्षूणां **निवासयोग्य + टाप्** ...................... स्थली अस्ति।

34. परशुरामकुण्डम् एकं **दृश् + अनीयर्** ...................... स्थलं वर्तते।

35. अरुणाचले अनेकानि **दर्शनीयानि** ...................... + ...................... स्थलानि सन्ति।

36. इमां पर्यटनविभागेन **प्रकाशितां** ...................... + ...................... सूचीं पठन्तु भवन्तः।

37. कालः सततं चक्रवत् **परिवृत् + शानच्** ...................... भूतं वर्तमानं भविष्यदपि वीक्षते।

38. **कियती** ...................... + ...................... प्राचीना इयं सृष्टिः इति किं यूयं जानीथ ?

39. **विवेक + णिनि** ...................... पण्डितः भवति।

40. मरणं **मूर्खत्वं** ...................... + ...................... भवति इति शङ्कराचार्यः अकथयत्।

❖ **अधोलिखितेषु वाक्येषु स्त्रीप्रत्ययान्तं ( टाप्-ङीप्-युक्तं ) पदं चित्वा कोष्ठके पृथक् पृथक् लिखत –**

(i) मधुरा वाणी प्रीणयति मनः।

(ii) सतां बुद्धिः हितकारिणी भवति।

(iii) सत्सङ्गतिः सर्वत्र दुर्लभा।

(iv) उपकारकर्त्री प्रकृतिः धन्या।

(v) कुलाङ्गना सदा सम्मानस्य अधिकारिणी।

(vi) नैतिकी शिक्षा आवश्यकी।

**टाप्**

| | | |
|---|---|---|
| (i) मधुरा | (ii) ...................... | (iii) ...................... |

**ङीप्**

| | | |
|---|---|---|
| (i) हितकारिणी | (ii) ...................... | (iii) ...................... |
| (iv) ...................... | (v) ...................... | |